Naveen Shodh Sansar (An International Refereed / Peer Review Multidisciplinary Research Journal)
RNI No.- MPHIN/2013/60638, ISSN 2320-8767, E- ISSN 2394-3793, Scientific Journal Impact Factor (SJIF)- 8.054,
January to March 2026, E-Journal, Vol. I, Issue LIII (53), ISO 9001:2015 - E2024049304 (QMS)

# जानकीहरणमहाकाव्ये रसविमर्शः

**डॉ. नीलकंठ करुआन***

* असिस्टेन्ट प्रोफेसर, अविनाश ग्रुप ऑफ इंस्टीट्यूशंस, हैदराबाद (तेलंगाना) भारत

**शोध सारांश –** अद्यतनशास्त्रचिन्तायां काव्यस्य हृदयभूतः रसः प्रमुखविमर्शविषयः। जानकीहरणमहाकाव्ये महार्षिवाल्मीकिना प्रतिपादितं रामायणकथासूत्रं नव्या शैलीया पुनर्निर्मितम्। अस्य महाकाव्यस्य प्रमुखलक्षणं यत् विविधप्रसङ्गेषु नानारसानां सुन्दरं समन्वयमस्ति। विशेषतः शृङ्गार, वीर, करुण, विभत्स, रौद्र, इत्यादयः रसाः पात्रनाट्यगतैः भावैः, आलम्बन–उद्दीपनाद्यङ्गैः च यथासम्भवम् आविर्भावं प्राप्नुवन्ति। कविना वर्णितं हरणप्रसङ्गं करुणरसस्य परिपाकं दर्शयति, तथा सीतारामयोः विरहवेदनां शृङ्गारभङ्ग्याः माध्यमेन सजीवाकरोति। युद्धवर्णनेषु वीररसस्य उत्कर्षो द्रष्टुं शक्यते। एतेषां सर्वेषां रसस्वरूपाणां सूक्ष्मविश्लेषणं कृत्वा एषा शोधकृतिः जानकीहरणमहाकाव्यस्य कलात्मकं, भावात्मकं च मूल्यं प्रकटयति।
**मुख्यशब्दाः** रसविमर्शः, जानकीहरणमहाकाव्यम्, शृङ्गाररसः, वीररसः, करुणरसः, भाव–नाट्यतत्तवम्, अलङ्कारशास्त्रदृष्टिः, काव्यान्वयविश्लेषणम्।

**प्रस्तावना –** :प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' अर्थात् प्रयोजनं विना मन्दो जनोऽपि कार्ये प्रवर्तितो न भवति इति। काव्यस्य प्रयोजनप्रसङ्गे मम्मटेन उक्तम् –

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृत्तये कान्तासम्मिततयोऽपदेशयुजे।।**

नानाप्रकाराः साहित्यप्रक्रियाः अत्याधुनिका अपि संस्कृतसाहित्ये दरीदृश्यन्ते। इतिहासः, पुराणम्, महाकाव्यम्, खण्डकाव्यम्, गीतिकाव्यम्, चरित्रकाव्यम्, स्तोत्राणि, रुपकाणि इति साहित्यसंविधानानि अत्र पठितृणां मनः आवर्जयन्ति आह्लादयन्ति च। तत्र रघुवंश–कुमारसम्भव–किरातार्जुनीय–शिशुपालवध–नैषधीयचरितादीनि महाकाव्यानि लोके प्रसिद्धानि। महाकाव्येषु अपि कुमारदासस्य जानकीहरणम् इति महाकव्यम् संस्कृतवाङ्मये सुप्रसिद्धम्।

**कुमारदासस्य परिचयः –** कुमारदासस्य जानकीहरणमपि संस्कृतसाहित्ये लब्धप्रतिष्ठा कृतिः। कथ्यते हि यद्रघुवंशे स्थिते सति जानकीहरणं कर्तु कुमारदासो वा रावण एव क्षमो नान्य इति। अत्रैकतः रघुवंशे इति कालिदासग्रथितकाव्ये तदाख्ये अपरतस्तु रघुवंश्ये रामे इति। अयं सिंहलदेशे आसीदिति विमर्शकाः अभिप्रयन्ति। अस्य कालविषये, देशविषये च विमर्शकानां मध्ये ऐकरूप्यं वा ऐकमत्यं वा नास्ति।

**कुमारदासस्य कालः –**

1. काशिकावृत्तिः कुमारदासस्य परिचिता इव दृश्यते। अतः काशिकावृत्तिकर्तुः वामनस्य अर्वाचीनः इति आभाति।

2. माघेऽस्य पद्यमेकं प्रतिफलितमिव दृश्यते तस्मादयं माघात् प्राचीनः इति वक्तुं शक्यते।

3. वामनेन पद्यस्य चरणारम्भे खलु प्रयोगस्य दृष्टत्वस्य यद्रुदाहरणं प्रदत्तं तज्जानकीहरणं प्राप्यते। तस्माद् काव्यालङ्कारसूत्रवृत्तिकर्त्र वामनेन जानकीहरणं दृष्टमिति प्रतीयते।

**जानकीहरणं कर्तुं रघुवंशे स्थिते भुवि।**
**कविः कुमारदासश्च रावणश्च यदि क्षमः।।**

इति पद्ये राजशेखरः कविमिमं प्रशंसते। एभिः कारणैः सप्तमशतकापरार्धे कुमारदसो अवर्तिष्ट इत्यनुमीयते। केचित्तां माघपूर्ववर्तिनं परे तु तदपरकालभवमपि मन्यन्ते। एवमेव भमिकुमारदासयोरपि स्थितिः। केचित्तु तं कालिदाससमकालीनमपि मन्यन्ते। मन्यन्तां खलु यथेच्छं समालोचकाः। सामान्यतो विक्रमानन्तरं षष्ठशतकमेव कुमारदासस्य स्थितिकालं मन्यन्ते समालोचका यतो हि माघादारभ्य रामधारास्थाने कृष्णधारा प्रवहति। कुमारदासश्च रामधाराप्लुतः कविः। तेन हि तस्य माघपूर्ववर्तित्वमेव समुचितम्। यदि हि स सिंहलेश्वरस्तदाख्यस्तदा तु जानकीहरणस्य प्रणयनकालः 577 मितविक्रमाब्दमभितः सम्भवति नो चेदन्यथापि परिकल्पनीयमेव। वस्तुतस्त्वसौ भारविप्रवर्तितं पण्डितयुगं न मानागप्यनुसरति तेनासौ भारवेरपि पूर्ववर्ती इति ऊहितुं शक्यते।

**जानकीहरणमहाकाव्यस्य विषयवस्तु –** जानकीहरणं पञ्चविंशतिसर्गेषु विभक्तं महाकाव्यम्। कथ्यते हि अस्यैका हस्तलिपिः विंशतिसर्गव्यापिनी लभ्यते। सम्पूर्णग्रन्थस्तु सिंहलीभाषायामनूदित एव लभ्यते। ग्रन्थे अस्मिन् रामायणीया कथा निबद्धा अस्ति ततोऽपि चमत्कारितया। काव्यमिदं वैदर्भरीतेः क्रीडाभूमिः। अस्य हि यमकानुप्रासप्रयोगो विलक्षणः। प्रतिपाद्यार्थदृशा कालिदासकृतं रघुवंशमहाकाव्यम् अनुकरोति। अस्मिन् काव्ये पञ्चविंशतिसर्गाः सन्ति। प्रथमे सर्गे अयोध्यायाः महाराजदशरथस्य तत्पत्नीनां च, द्वितीये तृतीये जलकेलेः वसन्तस्य सूर्यास्तमयस्य रात्र्याः प्रभातस्य च, चतुर्थे पञ्चमे वंशाभिवृध्यर्थं पुत्रकामेष्टीयागवर्णनम्, पुत्राणां जन्मवृत्तान्तम्, षष्ठसर्गे मिथिलानगरस्य वर्णनम्, सप्तमाष्टमयोः जानक्याः विवाहवर्णनम्, नवमे अयोध्याम् आगमनम्, दशमे रामस्य यौवराज्याभिषेकम्, अन्तिमे जानकीहरणम्, एकादशे बालिवधः तथा वर्षावर्णनम्, द्वादशे लक्ष्मणेन सुग्रीवस्य भर्त्सना, त्रयोदशे वानरसेना एकत्रीकरणम्, चतुर्दशसर्गे सेतुबन्धनम्, पञ्चदशे अङ्गदेन रावणसभायां दौत्यप्रेरणा, षोडशसर्गे राक्षसकेलिवर्णनम्, सप्तदशसर्गात् विंशतिसर्गप्रर्यन्तं युद्धः तथा रावणस्य पराजयस्य वर्णना च सन्ति।

**रसविमर्शः –** रस इति शब्दः वेदेषु दृश्यते। सः क्वचित् जलार्थे क्वचित्

सोमरसार्थे च प्रयुक्तः भवति। स एव रसं लब्ध्वा आनन्दी भवति। रसरूपी रसास्वादी च स एव नाम परमात्मैवेति। तदनन्तरमयमेव हि शब्दः काव्यादप्यलौकिकानन्दायोपयोगित्वेन स्वीकृतः। रसध्वनियुक्तमेव उत्तमकाव्यमिति च प्रतिपादितम्। रसशब्दो ऋग्वेदे सोमरसजलक्षमीरसारार्थेषु प्रयुक्तः । जगतः परमसारभूतरसाऽनन्दसन्धायकः परमात्मा रसपदार्थः। अत एव रसानन्दो ब्रह्मानन्दसहोदर इत्युच्यते।

रसशब्दस्य व्युत्पत्तिस्तु एवं स्वीकर्तुं शक्यते रस्यते इति रसः। गुडादि नानाविधसम्मिश्रितास्वादनायोगः पानकरसः इवायमपि रस आस्वाद्यते। पानकरसो यथा साध्यो न सिद्धः तथा काव्यनाटकेष्वपि रस अलौकिककारणैः साध्यः भवति। भरतमुनिना नाट्यसास्त्रे उक्तम् –

**'नानव्यग्जनौषधिद्रव्यसंसयोगाद्रसनिष्पत्ति:नानाभावोपगमाद्रसनिष्पत्तिः'**

अपि च रामायणे यथास्थानं सर्वेषामपि रसानाम् अभिव्यक्तिः अवलोक्यते। कथितं च

**हास्य-शृङ्गार-करुण-रौद्र-वीर-भयानकैः।**
**बीभत्साद्भुतं-संयुक्तं कामेतदगायताम्॥**

वाल्मीकिरामायणादरभ्य भरतकाले रसगुणालङ्काराणाम् उदाहरणानि लभ्यन्ते। किन्तु संहिताब्राह्मणोपनिषत्कालात् बाल्मीकिरामायणपर्यन्तं तथा भरतकाले नाट्यशास्त्रे रसस्वरूपविषयकं भावविषयकं च नियमबद्धविवेचनं विवृतम्। अस्मिन् नाट्यशास्त्रे रसोत्पत्तौ विभावानुभावव्यभिचारिभावानां सम्यग्विवेचनं चास्ति। अस्य सस्य उत्पत्तिविषयकविचाराणामपि च सामाजिकेषु भावानां स्वरतालादि सर्वविषयाणां विवेचनमस्ति। यथा –

**रसा भावा ह्यभिनयाः धर्मो वृत्तिप्रवृत्तयः।**
**सिद्धिः स्वरास्तथातोद्यं गानं रङ्गश्च संग्रहः॥**

नाटकस्य रस एव प्रधानमिति महर्षिभिः प्रतिपादितम्। अयं च विषयः नाट्यशास्त्रे एवं प्रदर्शितः मुनिना भरतेन। यथा –

**न हि रसादृते कश्चिदर्थः प्रवर्तते।**
**तत्र विभाव-अनुभाव-व्यभिचार-संसोगाद्रसन्निष्पत्तिः॥**

विभावानुभावव्यभिचारिभावानां संयोगः परस्परसम्बन्धः। अस्मिन् विचारे विविधाः आलंकारिकाः तेषां शास्त्रानुसारं विविधानि मतानि प्रतिपादयामासुः। तत्र मनसः स्थितिद्वयं निष्पद्यते। भावः स्थायितां प्राप्य स्थितरूपेण तिष्ठन् रसावस्थां प्राप्नोति। इयं प्रथमस्थितिः। ये भावाः रसकोटौ नागच्छन्ति पुनः क्षणमात्रतां यान्ति परिपुष्टिं च कुर्वन्ति एते व्यभिचारिभावा इति। एतेषां सर्वेषां सम्मेलने रसः भवति।

रसभावयोर्मध्ये कः प्रधानः इत्यस्मिन् उपलक्षितमस्ति नाट्यशास्त्रे अग्निपुराणे काव्यलङ्कारशास्त्रे च। यथा –

**न रसो भावहीनोऽस्ति न भावो रसवर्जितः**
**परस्परकृता सिद्धस्तयाभिनये भवेत्।**
**भावयन्ति रसानेभिभाव्यन्ते च रसामिति॥**

नाट्यशास्त्रे अपि रसविषये भरतमुनिना बहुविचारः कृतोऽस्ति। भरतमुनेः रससूत्रं प्रधानतया सर्वैः स्वीक्रियते।

नाट्यशास्त्रप्रणेता भरतमुनिना उद्घोषितम् रसविषयकसूत्रमाधारीकृत्य परवर्तिनिकाले अन्यैः आलङ्कारिकैः विविधप्रकारैः रसस्य स्वरूपं विचारितम्। यथा धनञ्जयः जन्नाथः विश्वनाथः आनन्दवर्धनः इत्यादयः तेषां ग्रन्थेषु रसविषये प्रतिपादितवन्तः।

महाकविकुमारदासः जानकीहरणमहाकाव्ये शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-वीभत्स-अद्भुत-शान्त-वात्सल्यादि रसानां प्रयोगोऽकरत्। किन्तु तेन जानकीहरणमहाकाव्ये मुख्यरूपेण शृङ्गाररसोऽङ्गिरूपेण उपस्थापियति।

**शृङ्गाररसः-** महाकविकुमारदासः जानकीहरणम् इति महाकाव्ये विप्रलम्भशृङ्गारसम्भोगशृङ्गारयोः सूक्ष्मरूपेण चित्रणं कृतवान्। यथा –

**पुनरप्यपश्यमवनीन्द्रसुतां क्षितिधूलिसरितचारुमुखीम्।**
**शरदच्छमैघपिहितेन्दुकलां हिमनष्टपद्मनलिनीमिव॥**

नखशिखसौन्दर्यवर्णनं, उद्यानविहारं, जलकेलिं, रागरंगादि शृङ्गाररसेन महाकविकुमारदासः 'जानकीहरणम्' इति महाकाव्ये उपस्थापितवान्।

हास्यरसः –

'जानकीहरणम्' इति महाकाव्ये हास्यरसस्य वर्णना स्वल्पं दृश्यते। दशरथेन वृद्धावस्थायाः वर्णनं महाकविकुमारदासः हास्यरसेन प्रकाशयति–

**जीविते जीर्णवयसः प्रत्याशा मे मुमुर्षतः।**
**तिर्यग्विकम्पितैर्मूर्ध्नो नास्तीति प्रथयन्निव॥**

**करुणरसः –** 'जानकीहरणम्' इति महाकाव्यं करुणरसः प्रधानः काव्यम्। तथापि 'जानकीहरणम्' इति महाकाव्ये करुणरसस्य व्यंजना स्वल्पं दृश्यते। श्रवणविलापः कालिदासभवभूतयोः समानमेव महाकविकुमारदासः 'जानकीहरणम्' इति महाकाव्ये प्रकाशयति। दशरथं प्रति श्रवणकुमारस्योक्तिः –

**जीर्णो जतुन्यासनिरुद्धरन्धः कुम्भश्च मौर्वी तरुवल्कलश्च।**
**एतेषु यन्मां विनिहत्य गम्यं तद् गृह्यतामस्तु भवान्कृतार्थः॥**

**रौद्ररसः –** महाकविकुमारदासेन विविधः युद्धवर्णनं रौद्ररसेन उपस्थापितवान्। यथा – कोपाविष्टलक्ष्मणस्य स्वरूपवर्णनं, रावणस्य क्रोधादि इत्यादयः।

**वीररसः –** 'जानकीहरणम्' इति महाकाव्ये युद्धस्य वर्णनं कुमारदासः वीररसेन सुन्दररूपेण उपस्थापितवान्। यथा – दशरथस्य मृगया, रामेण मारीचः सुबाहुश्च युद्धः, जटायुरावणयोः युद्धः, अशोकवाटिकायाः ध्वंसः, अपि च जानकीहरणम् इति महाकाव्यस्यान्यत्रापि वीररसः दृश्यते।

**भयानकरसः –** ताडकायाः स्वरूपवर्णनं महाकविकुमारदासः भयानकरसेन उपस्थापितवान् –

**नवकृत्तविलासिनी-कर-प्रसवोत्तांस-विभूषितानता।**
**नृशरस्तितिमेखलागुणस्फुरणक्रूरटक्कणत्कटिः॥**

एतदतिरिक्तं परशुरामस्वरूपवर्णन्, कुम्भकर्णस्वरूपवर्णनं, इत्यादयः स्थले भयानकरसः दृश्यते।

**बीभत्सरसः –** वीभत्सरसः शृङ्गाररसस्य बाधको भवति। 'जानकीहरणम्' इति महाकाव्ये शृङ्गाररसस्य वर्णनं स्वल्पं दृश्यते। यथा –

**रक्षोवसांपिशितपूरितकुक्षिरन्ध्रः काकुत्स्थबाणहतहस्तिमुखाधिरूढः।**
**पर्यन्तलग्नरुधिराणि मृदुप्रणादस्तुण्डानि वायसगणो रदने ममार्ज॥**

**शान्तरसः –** विश्वामित्रस्य आश्रमवर्णनं, देवतायाः विष्णुस्तुतिः महाकविकुमारदासः शान्तरसेन उपस्थापितवान्।

**वात्सल्यरसः –** जानकीहरणमहाकाव्ये वात्सल्यरस्योदाहरणं प्राप्यते। यथा–

**परित्रस्ते गोपयति कृकवाकुध्वजै सति।**
**कार्तस्वरमयं मेषं मातुरुत्सङ्गसङ्गिनि॥**

अर्थात् मातुरुत्संगिनि परित्रस्ते कृकवाकुध्वजे कार्तस्वरभयं मेषं गोपयति। अस्मिन् श्लोके वात्सल्यरसः दृश्यते।

**उपसंहारः-** सारतः द्रष्टव्यं यत् 'जानकीहरणमहाकाव्यं' रसप्रयोगे उत्कृष्टं

काव्यम् । करुण, शृङ्गार, वीरस्य सुन्दरसमन्वयेन काव्यं भावसमृद्धं स्फुटं च भवति । कवेः रसप्रतिपादनकौशलं, वर्णनशैली, अलङ्कारयोजना च काव्यं अत्युत्कृष्टं साहित्यकृतीं रूपयन्ति । अतः अस्मिन् महाकाव्ये रसविमर्शः अध्ययनयोग्यः, मूल्यवान्, चिरस्मरणीयश्च भवति ।

**सन्दर्भ ग्रन्थ सूची:-**

1. जानकीहरणम् (सर्ग- 1-2) , सविमर्श सुबोधिनी हिन्दीव्योपेतम् , डॉ. यदुमन्दन मिश्र , चौखम्भा संस्कृत संस्थान , वाराणसी
2. आप्टे, शिवराम. संस्कृत-हिन्दी-कोश. राष्ट्रिय संस्कृत संस्थान्, 1987.
3. उपाध्याय, बलदेव. संस्कृतवाङ्मय का बृहद् इतिहास. उत्तर प्रदेश संस्कृत संस्थान, 1998.
4. चन्द्र, ईश्वर. पाणिनिविरचिता अष्टाध्यायी. चौखम्बा संस्कृत प्रतिष्टान, 2013.
5. जगन्नाथ, एस्. ग्रन्थसम्पादनशास्त्रम्. पूर्णप्रज्ञासंशोधनमन्दिरम्, 2014.
6. मिश्र, राजेन्द्र. शोधप्रविधि एवं पाण्डुलिपिविज्ञान. बलराम हाउस, 2008.
7. मिश्र, शितिकंठ. जैन साहित्य का बृहद् इतिहास. खण्ड - 1, पाश्वनाथ विद्यापीठ, 1998.
8. विनयसागर, महोपाध्याय. खरतरगच्छ का बृहद् इतिहास. प्राकृत भारती अकादमी, 2005.
9. काव्यालङ्कारसारसङ्ग्रहः. भाण्डारकर ओरियन्टल सीरीज, 1925.
10. द्विवेदी, पारशनाथ. नाट्यशास्त्र का इतिहास. चौखम्बा सुरभारती प्रकाशन, 2004.
11. द्विवेदी, शिवप्रसाद. साहित्यदर्पणम्(विश्वनाथः). चौखम्बा सुरभारती प्रकाशन, 2017.
12. A Discriptive Catalogue of Sanskrit Manuscript. (Kavya and Alankar) Vol. 4, Bhandarkara Oriental Research Institute,1944, pp.24-26.
13. Jagannatha, S. Manuscriptology An Entrance. Parimal Publication, 2007.
14. Jânakîharana of Kumâradasa, A study , Critical Text and English Translation of Cantos XVI-XX ,By Dr. C.R. Swaminathan. Motilal Banarsidass Delihi -1977
15. Jânakîharana of Kumâradasa: Cantos V-VII & X With a Sanskrit Commentrary by Shastree Narayana Vasudeva Nigudhar ; English notes and translition By K.M Jaglekar –Bombay,The Oriental Publishing compary-1911
16. The Jânakîharana of Kumâradasa: I-X /edited by Gopal Raghunath Nandarglkar Bombay [S.N ] -1907
17. Jânakîharana /Kumâradâsakrtam; Haridas Sastrina Sankalitam ; Calcutta:Kalipada Bandyopadhyaya, 1893

*************